अम्बालिके ! न मानयति कश्चन य० २३, १८ । नाय्योक्ता-वपि तत्रैव, २ अम्बष्ठालतायां, ३ काशीराजकन्यायाञ्च । "अथाशौषं महाबाहो तिस्रः कन्याः स्वयम्वराः । रूपेणाप्रतिमा लोके काशीराजसुतास्तदा । अम्बां चैवाम्बिकां चैव तथैवाम्बालिकामिति । राजानश्च समाहूताः पृथिव्यां भरतर्षभ ! । "अम्बा ज्येष्ठाभवत्तासामम्बिका त्वथ मध्यमा । अम्बालिका च राजेन्द्र ! राजकन्या कनीयसी इत्युपक्रम्य । अम्बाया उपाख्यानं विस्तरेण वर्णितम् भा० उ०प० अम्बोपाख्याने । "मया सौभपतिः पूर्व्वं मनसा हि वृतः पतिः इत्यम्बियोक्ते "अनुजज्ञे तदा ज्येष्ठामम्बां काशीपतेः सुताम् । अम्बिकाम्बालिके भार्य्ये प्रादात् भ्रात्रा यवीयसे । भीष्मो विचित्रवीर्य्याय विधिदृष्टेन कर्म्मणा" भा०आ०प० ।

**अम्बाला** स्त्री अम्बेति शब्दं लाति धत्ते ला—क । मातरि ।

**अम्बालिका** स्त्री अम्बालैव स्वार्थे के ह्रस्वे अत इत्त्वम् । मातरि, १पाण्डुराजमातरि काशीराजकन्यायां विचित्रवीर्य्यस्य भार्य्यायाम् ।

**अम्बिका** स्त्री अम्बैव कन् । १मातरि २दुर्गायाम् "आशीर्भिरेधयामासुः पुरः । पाकाभिरम्बिकाम्" कुमा० । काशीराजस्य मध्यमकन्यायां विचित्रवीर्य्यस्य भार्य्यायां धृतराष्ट्रस्य ३मातरि ।

**अम्बिकापति** पु० ६त० । शिवे । [ १गणेशे २धृतराष्ट्रे च ।

**अ(आ)म्बिकेय** पु० अम्बिकाया अपत्यम् ढ (ढक्) वा ।

**अम्बु** न० अबि शब्दे—उण् । १लग्नावधिके चतुर्थस्थाने २(बाला) इति ख्यातायामोषधौ ३ जले "गाङ्गमम्बु सितमम्बु यामुनं कज्जलाभमुभयत्र मज्जतः का०प्र० ।"छातेतराम्बुच्छटा" का०प्र० "विश्वासाय विहङ्गानामालवालाम्बुपायिनाम् । "तौ सरांसि रसवद्भिरम्बुभिः" इति च रघुः । "फलं कतकवृक्षस्य यद्यप्यम्बुप्रसादनम्" मनुः । तच्च जलम् रसतन्मात्रादुत्पन्नो भूतविशेष इति सांख्याः पञ्चीकृतेभ्य एव पञ्चभ्यो भूतेभ्यः स्थूलतया उत्पन्नमिति वेदान्तिनः जलभूतांशबाहुल्यात् जलत्वव्यवहारः "वैशेष्यात्तद्वादः" शा०सूत्रात् । तस्य च रूपरसस्पर्शशब्दा विशेषगुणाः "योयोयावतिथश्चैषां स स तावद्गुणः स्मृत" इति मनुना भूतमध्ये चतुर्थस्य जलस्य चतुर्गुणत्वाभिधानात् "शब्दस्पर्शौ रूपरसौ सलिलस्य गुणा अमी" भा०शा०प० उक्तेश्च "जले चुलचुलध्वनिः । शीतस्पर्शः शुक्लरूपं रसो माधुर्य्यमीरितम्" पञ्चद० । "अग्नेरापः" इति श्रुतेस्तस्याग्निप्रभवत्वम् यथोक्तं "तत्तेज ऐक्षत बहु स्यां प्रजायेयेति तदपोऽसृजत तस्माद्यत्र क्व च शोचति स्वेदते पुरुषस्तेजस एव तदध्यापो जायन्ते" छा० उ० । "तेज इति प्रसिद्धं लोके दग्धृपक्तृप्रकाशकं रोहितञ्चेति तत्सृष्टं तेज ऐक्षत । तेजोरूपत्वेन स्थितं सदैक्षतेत्यर्थः । बहु स्यां प्रजायेयेति पूर्व्ववत्तदपोऽसृजत । आपो द्रवाः स्निग्धाः स्यन्दिन्यः शुक्लाश्चेति प्रसिद्धं लोके । यस्मात्तेजसः कार्य्यभूता आपस्तस्माद्यत्र क्व च देशे काले वा शोचति सन्तप्यते स्वेदते प्रस्विद्यते वा पुरुषस्तेजस एव तदापोऽधिजायन्ते । ता आप ऐक्षन्तेति पूर्व्ववदेव आकारसंस्थितं सदैक्षतेत्यर्थः भा० । "तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति "सेयं देवतेमास्तिस्रो देवता अनेनैव जीवेनात्मनानुप्रविश्य नामरूपे व्याकरोत्" छा०उ० ॥ "सेयं तिस्रो देवता अनुप्रविश्य स्वात्मावस्थे वीजभूते अव्याकृते नामरूपे व्याकरवाणीति तासाञ्च तिसृणां देवतानामामेकैकां त्रिवृतं करवाणि एकैकस्याः त्रिवृत्करणे एकैकस्याः प्राधान्यं द्वयोर्द्वयोर्गुणभावोऽन्यथा हि रज्ज्वा इवैकमेव त्रिवृत्करणं स्यात् न तु तिसृणां पृथक् त्रिवृत्करणमिति । एवं हि तेजोऽबन्नानां पृथङ्नामप्रत्ययलाभः स्यात्तेज इदम्"इमा आपः, अऽन्नमिदमिति च पृथङ्नामप्रत्ययलाभे देवतानां सम्यग्व्यावहारस्य प्रसिद्धिः प्रयोजनं स्यात् । एवमीक्षित्वा सेयं देवतेमास्तिस्रो देवता अनेनैव यथोक्तेनैव जीवेन सूर्य्यबिम्बवदन्तः प्रविश्य वैराजं पिण्डं प्रथमं देवतादीनां च पिण्डमनुप्रविश्य यथासङ्कल्पमेव नामरूपे व्याकरोदसौनामायमिदंरूप इति तासाञ्च देवतानां गुणप्रधानभावेन त्रिवृतं त्रिवृतमेकैकामकरोत्कृतवती देवता" भा० । "अद्भिः सोम्य ! शुङ्गेन तेजो मूलमन्विच्छ" छा०उ० "अद्भिः शुङ्गेन तेजो मूलं कार्य्येण कारणम् अन्विच्छ "तेजो वा अद्भ्यो भूयस्तद्वा एतद्वायुमुपगृह्याकाशमभितपति तदाहुर्निशोचति नितपति वर्षिष्यति वा इति तेज एव तत्पूर्व्वं दर्शयित्वाऽथापः सृजते तदेतदूर्द्ध्वाभिश्च तिरश्चीभिश्च विद्युद्भिर्ह्रादाश्चरन्ति तस्मादाहुर्विद्योतते स्तनयति वर्षिष्यति वा इति तेज एव तत्पूर्व्वं दर्शयित्वाऽथापः सृजते तेज उपास्वेति" छा०उ० ॥ "तेजो वाऽद्भ्यो भूयः, तेजसोऽप्कारणत्वात् । कथमप्कारणत्वमित्याह । यस्मादब्योनिस्तेजस्तस्मात्तद्वा एतत्तेजोवायुमात्मगृह्यावष्टभ्य स्वात्मना निश्चलीकृत्य वायुमाकाशमभिव्याप्नुवत्तपति यदा, तदाहुर्लौकिकाः अभिशोचति सन्तपति सामान्येन जगन्ति तपति देहानतो वर्षि-